नं० ५६३७ — घ

(पार्थिव) शिवपूजा

पत्राणि 12 धर्मशास्त्रम्

संपूर्णम्



~~नं० ५५~~

नं. ५५६२ क

(पार्थिव) शिवपूजा

नं० ५६३७-घ

१२ पत्राणि

(पार्थिव) शिवपूजा (धर्मशास्त्रम्)

धर्मशास्त्रम्

पत्राणि १२ (संपूर्णम्)

5637

P - 12 complete



शि॰ ॐ श्रीगणेशाय नमः अथ पार्थिवशिवपूजाविधिः

पू॰ १ मृदाहरणसंघट्टप्रतिष्ठाह्वानमेव च स्नापनं पूज

नं चैव विसर्जनमतः परं हरो महेश्वरश्चैव शूलपा

णिः पिनाकधृक् पशुपतिः शिवश्चैव महादेव इति क्र

मात् १ ततो ध्यानं ध्यायेन्नित्यं महेशं रजतगिरि

निभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृ

गवराभीतिहस्तं प्रसन्नं पद्मासीनं समन्तात्स्तुत

ममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं

निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रं इति ध्यात्वा स्व

शिरसि पुष्पं दत्वा मानसैः संपूज्य पुनर्ध्यात्वा शिवे

दद्यात् ततः पिनाकधृक् इहागच्छेत्यावाह्य इदं स्ना

पीठमाश्रय नीयं ॐ पशुपतये नमः ॐ शिवाय नमः इति पाद्या

र्घाचमनीयगन्धपुष्पधूपदीपनैवेद्यादि दद्यात्

ततो वामदेवजैर्नामभिः प्रपूजयेत् तद्यथा ॐ श

र्वाय क्षितिमूर्तये नमः ॐ भवाय जलमूर्तये नमः

ॐ रुद्राय अग्निमूर्तये नमः ॐ उग्राय वायुमूर्त

ये नमः ॐ भीमाय आकाशमूर्तये नमः ॐ पशु

पतयेपञ्चमात्मन्मूर्तयेनमः ॐमहादेवायसोम
मूर्तयेनमः ॐईशानायसूर्यमूर्तयेनमः न
मेत्याशक्तिमूलमंत्रंजपेत ततःस्तवादिकं
कृत्वा महादेवक्षमस्वेतिविसर्जनंकुर्यात
ततःसंहारमुद्रयानिर्माल्यमानीयवामेत्रिको
णमंडलेचंडेश्वरायनमः इतिस्थापयेत ऋ
षयऊचुः भगवन्सूतसर्वज्ञशिवभक्तिपराय
ण पार्थिवीचमहापूजांकथयस्वमहामते
सूतउवाच शृणुध्वंमुनयःसर्वेरुद्रेणकथितं
पुरा यस्यविज्ञानमात्रेणवांछितंफलमश्नुते
महोत्पातेचदुर्भिक्षेदेशविध्वंसनेतथा परच
क्रागमेचैवदुःस्वप्नेऽद्भुतदर्शने ३ महाव्याधिभ
येचैवराजचौरभयादिषु महाशत्रुभयेचैवमहा
मत्तसमागमे ४ महीराज्यकामस्तुकन्याका
मस्तथैवच विद्यालक्ष्मीतथापुष्टिपशुकामा
स्तथैवच ५ देशप्राप्तिस्तथाग्रामपुत्रकामस्त

शि.
पृ.२

श्चैवच श्रामात्यपदकामस्तु कृषिकामस्तथै
वच ६ नरनार्य्योर्वशीकामोगोजाविकधना
र्थिये ७ श्चोर्य्यगर्तेनृपावामाथिमहाग्रसि
महावंधविमोक्षेच वेदग्राह्ये षु प्रांतसंकटे प
रचक्रागमेचैवजयकामस्तथैवच ८ अरण्ये
त्रयविनिर्मुक्तौमहापापक्षयेपिच डाकिनी
शाकिनीवैवभूतप्रेतपिशाचयोः ९ ज्वरवा
धाक्षयोचैवमुक्तिसिद्धूनिर्येनराः शिवभक्ति
रतोनित्यंदेव्याभक्तिविशेषतः १० कर्त्तव्यापार्थि
वीपूजालभतेवांछितंफलं अर्षयक्रतवः
तिथिर्मासस्तथावारेनक्षत्राएपुक्षेतानिच ११
लग्नयोगश्चकरणं मृदादिद्रव्यमेवच विधि
संपादनंचैवपूजाध्यानंविसर्जनं १२ कथय
स्वफलंतस्यलभते यथ्ययकपृथक स्तते
वाच श्रुणुराजन्महावाहोपूजांपार्थिसंति
की नस्यदर्शनमात्रेण सर्वपापक्षयोभवेत्

प्रज्ञारंभस्तु चैत्रे च बहुकामस्तु जायते ४ वै
शाखे वांछितां सिद्धिं ज्येष्ठे मरणमेव च आषा
ढे क्लेशमाप्नोति श्रावणो बुद्धिवर्द्धिनी १५ प्र
ज्ञानाशो भाद्रपदे महासिद्धिस्तथाश्विने का
र्तिके ज्ञानसिद्धिः स्यान्मार्गशीर्षे शुभं भवेत् पौ
षे हानिस्तु विज्ञेया माघे सिद्धिस्ततः परा फा
ल्गुणे सर्वसिद्धिः स्यात् जपयज्ञादिकर्मसु
इतिमासफलं प्रज्ञारंभे रवौ शुक्रे बुधे जीवे वि
शेषतः शनैश्चरस्तु न यो भौमे सोमे सिद्धिमवा
प्नुयात् १८ इतिवारफलं प्रजने प्रतिपन्नेष्टा
द्वितीया कामसाधिनी तृतीया क्षेममारोग्यं च
तुर्थी सिद्धिदा भवेत् १९ पंचमी शुभदा चैव ष
ष्ठी व्याधिविनिर्दिशेत् सप्तमी शुभदा चैवा
ष्टमी सौख्यवर्धिनी २० नवमी भोगमाप्नोति
दशमी सर्वकामदा एकादश्यां तु माज्ञेया जप
होमार्चने तथा २१ द्वादशी धनदा प्रोक्ता त्रयो

शि॰ दर्शपाराधने भद्रे मोक्षदा पुत्रमारुतया प्रज
१०.२ नेपि विशेषतः २२ चतुर्दशी नि विख्याता शि
वस्याराधनेपि च शक्रस्याराधने चैव महासि
द्धिप्रदा भवेत् २३ पितृपूजा सदा कार्या दर्शे
चैव विशेषतः यज्ञयोगादिकं कार्यं पूर्णिमा
यां तथैव च २४ इति तिथिफलं प्रस्थितो
ले ममारोग्यं भरणीप्राणसंक्षयः कृत्तिका
क्लेशमाप्नोति रोहिण्यां च सुखं भवेत् २५
धनधान्यागमश्चैव नक्षत्रे सोमदैवते आर्द्रा
यां सुखमाप्नोति कर्म क्षयं रुद्रपूजने २६ पुनर्व
सौ तथा पुष्ये दीर्घं विंदति जीवितं सार्पे दुःखं
विजानीयात् मघायां च भयं भवेत् २७ पूर्वा
त्रये सुखं वैरं उत्तरात्रयमेव च हस्ते सिद्धिश्च
विज्ञेया चित्रास्वातौ फलं तथा २८ राज्यप्रा
प्तिस्तथारोग्यं नक्षत्रे वह्निदैवते अनुराधायां
राज्यं तु ज्येष्ठायां च महत् सुखं २९ नैर्ऋते

चमहाङ्गःविवैल्लवे [illegible] यामेवेचव
ह्नःप्राप्तिवाहणेराज्यमेवच ३० रेवत्यांचमहा
सिद्धिंमेवेदेवस्यपूजने देवीपूजांविधानेनकृ
त्वोक्तफलमश्नुते इतिनक्षत्रफलं विष्कुंभेवि
जयश्चैववश्रीतिराज्यविवर्द्धिते आयुष्मान्भोग
मामोतिसौभाग्येसुखमश्नुते ३२ शोभनेज
यमाप्नोतिअतिगंडेधनक्षयः सुकर्मसिद्धिःसु
कर्माधाराधृतौशूलोर्थसंक्षयः ३३ गंडेरोगस्तु
विज्ञेयोवृद्धौसिद्धिश्चतत्क्षणात् ध्रुवेचलभ
तेराज्यंव्याघातेशिवमेवच ३४ वज्रेकष्टंविजा
नीयात्हर्षणेमृदमेवच सिद्धिःसिद्धिकरःप्रो
क्तः व्यतीपातेर्थसंक्षयः ३५ वरीयसिवित्तला
भःपरिघस्तुविवर्जयेत् शिवेपापंविजानीया
त्सिद्धेसिद्धिस्तथैवच ३६ वांछितंसाधये
त्साध्येशुभेसौख्यंवर्द्धते शुक्लेचनिर्मलाबु
द्धिःप्रजावृद्धिश्चयातरि ३७ ऐन्द्रेऐश्वर्यंवर्द्धतेवै

ब्रह्मेकपारेवि
जयंवाहितुंमो २
तियोःक्षयम्

हि

शि॰ द्वैवेष्टतं सकलं त्यजेत् इतियोगफलम्
वृ॰ ५ ववेचवर्द्धते सौख्यं धनहर्षिंचवालवे ३८ कौ
लवेकलहं प्रोक्तं नैर्तिले स्नात्वमेवच गरेविघ्नं
५ विजानीयात्वाणिज्ये वर्द्धते स्नात्वं ३९ सक
लावर्जयेद्विष्टिं यदिकल्याणमिच्छति श
कुनेदह्यतेपापं चतुष्पदे जयैर्भवेत् ४० नागे
तु ग्लं विजानीयात् किंस्तुघ्ने वैरिसंक्षयं
इतिकरणफलम् मेषेचशुभदं प्रोक्तं वृषे
हानिस्तथैवच ४१ मिथुने सिद्धिमाप्नोतिक
र्कैचक्षेममेवच सिंहेशत्रुक्षयंचैवकन्यायां
वर्द्धते सुखं ४२ तुलायांचमहालाभो वृश्चि
केवर्द्धतेप्रज्ञाः धनेधनमवाप्नोतिमकरे मृ
त्युमेवच ४३ पश्चात्ताप्नोतिसंतथा कुंभेकीर्तिर्मीने
ततःपरं इतिलग्नफलम् श्मशाने मृतम्मृ
मोचनीलीशालमसमुद्भवे ४४ उष्ट्रेग्राममपा
श्वेचतुःकर्मे द्रुमस्यलेभ्रच मयागारे हतम्

लेच्छायायांच विभीतके ४५ स्तनिकां वर्जयेत्प्रा
वा, ज्ञोश्मशानेघृतभूमिषु इतिस्नानविचारः श्वेताल
क्ष्मीप्रदा चैव गौरी राज्यप्रदा भवेत् ४६ रक्तावस्त्री
प्रदा ज्ञेया कृष्णा वैरिविनाशिनी पुत्रकामस्त
था मिश्रा वालुका मोक्षदा तथा ४७ गोमयं त
वनीतं च रक्तचंदनं सिता तथा दधिक्षौद्रं पयश्चैव
भस्मापि च तथा घृतं ४८ कर्पूरं पारदं चैव
वालुका कुंकुमं जले एतेषां च फलं सम्यक्
कथयस्व महामते ४९ गोमये प्राप्यते लक्ष्मी
पशुकामस्तथैव च गुडे पुत्रं प्रियावाग्मिर्जवली
तेन वांगना ५० सितायां च महाराज्यं प्राप्यते सं वे,
भजेत् संशयः शाड्रोर्जंघं चैव शर्करायां विशेषतः ५१
देशग्रामस्ततः क्षौद्रे पयसि मिश्रे गर्जस्तथा घृते
चायुस्तथार्कन्यायतनमैश्वर्यमेव च ५२ ग्रामा
त्यपदवीं प्राप्नोति कुर्याद्दधिमयं तथा गृहसंभा
रसिद्ध्यर्थं पूजयेत् पिष्टमयं शिवं ५३ महामंत्र

शि॰ प्रसंगार्थं पूजयेद्देवं भस्ममयं शिवं भस्मोद्धूलनम
१५ सं यस्तु नित्यं भस्म निषेवते ५५ चांडालाग्निं चि
5 ताग्निं श्वपचाग्निं तथैव च एतेषामग्निसंदा
त्याज्यो वर्जयेद्भस्म वै नृपः मंत्रसार्थाग्निसंभू
तो कुंडहोमस्य यद्भवेत् ५६ दैवहोमभवाद्भैव
ग्राहयेन्मंत्रसिद्धये शुद्धकाष्ठोद्भवास्यं तु शुद्ध
भूमेः स्थितो भवेत् ५७ अग्निर्भस्मेति मंत्रेण ग्रा
ह्यं महापूजार्थसिद्धये इति भस्मविचारः
कर्पूरेण महाराज्यं इहलोके भवेद्ध्रुवं ५८ म
त्व ऽत्र भूपावाप्नोति पापहेतेन च संशयः ॥ यं वत्स
दोषरहिता सर्वे गांगुलक्षणाः ५९ एतासां
च पयः श्रेष्ठं होमपूजादिकर्मसु यदि वैलोक
सैन्यं संपूजयेज्जलमयं शिवं ६० सर्वेषां सिद्ध
येनृते पूजयेद्देवं रत्नमयं इति द्रवविशेषफलम्
अथातः संप्रवक्ष्यामि स्पष्टराजनृपोत्तमः ६१ प्र॰
पूजाविधिस्ततो मंत्रं शंभुनागादितं शृणु ह

रोमहेश्वरः शंभुः शूलपाणिः पिनाकधृक ६२
शिवः पशुपतिश्चैव महादेवेति संस्मृतः मृदा
हरणं संघट्टं प्रतिष्ठाह्वानमेव च ६२ स्नापनं
पूजनं चैव विसर्जनमतः परं ॥ पूर्वादीशानप
र्यन्तं रुद्राय अग्निमूर्तये नमः भवाय जलमूर्तये
नमः ईशानाय वायुमूर्तये नमः दक्षिणदि
शि ईशानाय सूर्यमूर्तये नमः ॥ इति पार्थि
वपूजाविधिः अथ संकल्पः सर्वकामनासि
द्ध्यर्थे पार्थिवलिंगपूजाप्रतिष्ठां करिष्ये ।
सद्योजात इति मृदाग्रहणं वामदेवायेति ज
लप्रोक्षणं अघोरेति लिंगकरणं तत्पुरुषेणे
ति वाणं कुर्यात् ईशान इति वेदिकायां वाणं सं
योज्य नमः शिवायेति मूलमंत्रैः षोडशोपचा
रैः पूजां कुर्यात् भवाय भवनाशाय महादे
वाय धीमहि उग्राय चोग्रनाशाय शर्वाय श
शिमौलिने ६४ अनेन मंत्रेण पूजयेत् ॥

पि॰
पू॰ ९

यः कृत्वा पार्थिवं लिंगं पूजयेत्तु भवेदिकं ९४
वै धनवान्श्रीमानंततः रुद्रोभिजायते ९५ त्रि
संध्यायो र्चयेत्तिसं लिंगं कृत्वा च पार्थिवं द
शैकादशकं यावत्तस्य पुण्यफलं शृणु अ
नेनैव स्व देहेन रुद्रलोके च संतिहि पापहा
सर्वमर्त्यानां दर्शनास्पर्शनादपि ९६ अथ वि
सर्जनं हरो महेश्वर श्रीवत्सः स्वेति विसर्जं
नं प्राणयोगवियोगश्चैव तन्योगवियोगात:
९७ तिमिषं तिमिषार्द्धं वा शिवं तु शिवपूजनं
अनेन प्रकारेण वंधमोक्षणार्थं ९८ प्रथम
दिवसादारभ्य एकविंशति दिनपर्यंतं शि
वपूजाकामो नरो नारी सह ध्याकार्यं द्वाविंशता
दारभ्य एकैक दिनेन्द्रतं कार्यं स यो मत्कामभ
वति इति पार्थिवपूजाविधिः एकादश प्र
कारेण पूजा कथ्यते पुरुषो वा स्त्री कुर्यात्
विधानं प्रतिदिनमेकं कृत्वा षोडशोपचार

पूजांकृत्वा गिरिराणीपुष्पंघृतंनैवेद्यं पंचशत
दिनपर्यंतंपूजयेत् ऋणान्मुक्तोभवति प्रति
दिनंद्वयंकृत्वाषोडशोपचारपूजामल्लिकापु
ष्पंगुडोनैवेद्यं शतदिनपर्यंतंपूजांकुर्यात्पुत्रो
भवति प्रतिदिनत्रयंकृत्वाकरवीरपुष्पंशर्क
रानैवेद्यंपंचशतदिनपूजांकन्याभवति ३ प्रति
दिनचत्वारिलिंगानिकुर्यात् कुंभपुष्पंपय
नैवेद्यंपंचशतदिनंपूजयेत् विवाहःभवति ४
प्रतिदिनंषट्लिंगानिकृत्वावकुलपुष्पंमधु
नैवेद्यं दिनशतत्रयंपूजयेत् कलहान्मुक्तो
भवति ५ प्रतिदिनेअष्टलिंगानिकृत्वाविल्व
पत्रंलड्कानैवेद्यं शतत्रयपूजयेत् विद्याभव
ति ६ प्रतिदिननवलिंगानिकृत्वाधत्तूरपुष्पं
सर्वमन्नंनैवेद्यं एकशतदिनंपूजयेत् व्यापारो
भवति ७ प्रतिदिनेलिंगंदशकंकृत्वापुष्पंअ
पूपनैवेद्यं वर्षमेकंकृत्वाहरगस्यागमंतंभ

शि॰
पृ॰ ८

वति ८ प्रतिदिनमेकादशकं कृत्वा षोडशो
पचारः कर्पूरधूपं पंचखाद्यं नैवेद्यं पंचदश
मानितं कृत्वा सुवर्णरजतमुक्ताफलप्रवाल
पत्यादिसमस्तं गतं तत्रास्यागमो भवति ९
एकादशप्रकारेण मंत्रविधिः कथ्यते हराय
नमः मृदाहरणं महेश्वराय नमः संघटनं
शंभवे नमः पद्मोपरिस्थापनं पूर्वोक्तध्यानं कृ
त्वा पश्चात् प्राणप्रतिष्ठा शिवस्य प्राणा शिव
स्य जीव इह स्थितः शिवस्य सर्वेन्द्रियाणि वा
ङ्मनोनयनश्रोत्रघ्राणा इहैवागत्य सुखं चि
रं तिष्ठन्तु स्वाहा पिनाकपाणे आगच्छ तिष्ठ ति
ष्ठ संनिहितो भव संनिरुद्धो भव अत्राधिष्ठानं
कुरु पूजां गृहाण पिनाकपाणये नमः इति
स्नानं शिवाय नमः इति षोडशोपचारपूजां
कुर्यात् सर्वापद्विनिर्मुक्तये नमः इति प्राच्यां
रुद्राय अग्निमूर्तये नमः इति दक्षिणस्यां भी

मायश्चाकाशमूर्तयेनमः इतिनैर्ऋत्यां पशु
पतयेजयमानमूर्तयेनमः इतिवारुण्यां महा
देवायसोममूर्तयेनमः इतिवायव्यां ईशानाय
सूर्यमूर्तयेनमः इतिसोम्यांमध्येतुनमः ततः
पुष्पांजलिंदत्वाप्रणमेत् षडाक्षरमष्टोत्तरश
तंजपेत् महिम्नादिस्तुतिंकारयेत् नमस्कारः
मनसेप्सितानिप्रार्थयेत् लिंगविसर्जनम्
शिवार्पणमस्तु नमःशिवाय सरस्वत्यास्तटे
रम्येशौनकाद्यास्तपोधनः सूतंपरमयाभ
क्त्यापप्रच्छुःपरमादरात् १ ऋषयऊचुः
सूतशंकरधर्मज्ञमस्त्यर्थंकीदृशंशिवं
लिंगंपूज्यंमहाभक्त्याविधानंतस्यकीदृशं २
किंफलंतस्यतत्सर्वंकथयाशुप्रसीदमां
यतोभस्मत्रिपुंड्रांकोतिस्त्रंरुद्राक्षधारणं
सूतउवाच साधुपृष्टंऋषयःसर्वेलिंगपूज
नमुत्तमं नारदेनपुरासम्यक्कथितंमन

शि· पृ· ८

8

कादिषु ४ तेभ्यः सत्यवाताम्सूतः सर्वज्ञः क
रुणानिधिः कथयामासमानहिव्रतंकरु
णयागिरा ५ कदाचिन्नारदश्चारुकंदरंमंद
रंमाययौ तत्रासीनंमहादेवंपार्वतीसहितं
विभुः प्रदक्षिणत्रयंकृत्वाप्रणिपत्यपुनः
पुनः पप्रच्छपरमाभक्त्यानारदोदेवदर्शनः ७
केनदेवविधानेनभुक्तिमुक्तिश्चवेन्नृणां
तत्सर्वंकथयाश्रुत्वामनुयाह्योस्म्यहंयदि
८ सर्वपापक्षयकरंसर्वरिष्टविनाशनं स
र्वसंपत्प्रदंचैवकलौसर्वत्रसिद्धिदं ९ ईश्व
रउवाच श्रृणुनारदवक्ष्यामिलिंगविधान
कं यस्यपूजनमात्रेणकृतकृत्योभवेन्नरः
१० स्रदाश्चतुर्विधांविद्धिसिताकृष्णाच
लोहिता पीताश्वेताहिजाश्चैवयाह्याभ
क्तायथाक्रमम् ११ गत्वास्थलेनमस्कृत्वा
मंत्रमेतंसमुच्चरेत् सर्वाधारधरारूपेत्व

रूपस्तिकामिमां १२ गृह्णीयामिप्रसादात्
त्वलिंगार्थंभवमांप्रभो पात्स्यादात्मनःश
क्तिस्स्टंतावत्समुत्क्षिपेत् १३ नोचेन्नदंडंत
स्याहंतदस्यानदंडकं एवंफलहृयान्नत
कुर्याच्चकदाचन १४ वर्द्धमानंस्टंदंयावद्
नमंमध्यमंतथा अल्पमल्पतरंतच्चकनि
ष्टस्यान्नतःपरं १५ आनीयारण्यमथवाच
नदीतीरेसरस्यपि जलाशयेवाह्यन्यस्मि
नंतिकेस्थापयेत्स्टंदं १६ शुद्धेनवारिणाभ्यु
क्ष्यप्राणेनैवेतिचमंत्रतः मंत्रेश्चसर्वैश्शैवेतप्र
णवेनयुतेनच १७ तृणकंटककाष्ठादिरव
र्परेभस्मसेकतं चर्पणादिविलेपेनविरुद्ध
फलदायकं १८ स्पर्शेयत्नेनमहतानोद्विजो
ह्निकदाचन स्नातस्त्रिपुंडंभस्मादिश्तिभाले
शिवंस्मरेत् १९ रुद्राक्षमालाभरणोभक्त्याप
रमयायुतः शुद्धभावसमायुक्तोहृतसंक

शि० ल्पनिश्चयः २० हृद्वस्त्रकजपंकुर्वन्नहृत्
पृ० ९ येतितमोनमः पीठंसंचटनंकुर्वन्पीठं
कृत्वायथाविधिः २१ शलाकावर्त्मलेन
स्मान्मानयाहपामीरितं तत्सूत्रमानंपी
ठेस्मात्परिणाससहेविस्तरं २२ पीठोत्पविंधे
अपरंदीर्घस्त्र --- समानंविवस्त्रंच
मध्यंतत्सूत्रमानकं २३ तदर्द्धेहिप्रमाण
तंस्नदेवंसूत्रनिर्णयः लिंगमेवंविधानेन
सुंदरंचातिशोभनं २४ सर्वलक्षणसंयुक्त
मभिष्टफलदायकं पंचवक्त्रंत्रिनयनंच
सर्वाङ्गंमहेश्वरं २५ नागयज्ञोपवीतंचक्रा
त्रचर्मोत्तरीयकं हिमखंडनिभंदीप्तंनील
कंठंशिवालयं २६ नमोमहेश्वरागच्छदे
वदेवजगत्पते प्रसादंकुरुमेदेवमावाराजे
तिमंत्रवः २७ अर्चयेत्करवीराद्यैर्गंधाद्यैस्त
द्दीपकैः घृतदीपादिनैवेद्यैर्ताम्बूलफलसं

युतैः २८ पंचाक्षरेणमंत्रेणतथास्त्रंजया
दिव नमोमंत्रेणवादेवंपूजयेत्परमेश्वरं २९
हरोमहेश्वरःशंभुःशूलपाणिपिनाकधृक
शिवःपशुपतिश्चैवमहादेवेतिविसर्जनं ३०
नमःपूर्वाचतुर्थ्यंतानामानेतेद्विजन्मनः अ
न्येषामेवजातीनांनमोनाश्चैववर्जिताः स्त्री
णांसंकरजातीनांव्रतमेतदनुत्तमं पार्थिवं
पूजयेत्लिंगंसर्वकामप्रदंनृते ३१ पाषा
णेदारुकेदेशेदर्भांतरिसंस्थले शुष्कप्रकर
संकीर्णेनोवावेदिकाभुवि ३२ पूजयेत्पा
र्थिवंलिंगंसर्वप्रत्ययकारकं अपाहिभग
वान्शंभोसर्वत्वीगिरिजायते ३३ प्रसन्नो
भवदेवेशनमस्तेस्तुहिशंकरः इत्यावाह
नं विश्वेश्वरमहादेवराजप्रियेश्वरप्रयाप
ते आसनंदिव्यमीशानदास्येहंपरमेश्वरः
इत्यासनं महादेवमहेशानमहानंदपरात्प

शि॰ र गृहाणपाद्यंसहितंपार्वतीसहितेश्वर
पू॰१॰ इत्यापाद्यं त्र्यंबकःसकलाधारविपदादिवि
धानकः अर्घ्यंगृहाणदेवेशशंभोसर्वार्थदा
10 यकः इत्यर्घ्यं त्रिपुरांतकदीनार्तिनाशश्री
कंठधूर्जटे गृहाणाचमनंचारुपवित्रोदक
कल्पितं इत्याचमनं त्रिकालकाशिकाका
– स्थितिसंहारकारक स्नानंतीर्थहृतैस्तो
पैर्गृहाणपरमेश्वर इतिस्नानं कालाग्नि
रुद्रवरवरदाभयकारक वस्त्रंगृहाणदेवे
शदिव्यगंधोपशोभितं इतिवस्त्रं पुनराच
मनंदद्यादथोयज्ञोपवीतकं नीलकंठोप
वीतंचमयादत्तंगृहाणप्रभो इतियज्ञोपवी
तं सर्वेश्वरजगद्वंद्यदिव्यासनसमास्थित
गंधंगृहाणदेवेशदिव्यगंधोपशोभितं इ
तिगंधं सदाशिवशिवानंदअक्षतान्परमेश्व
र पुष्पाणिबिल्वपत्राणिविचित्राणिगृह्य

णमे इतिगंधं महादेवमहाधीशाजगदीशाति
रंजन धूपंगृहाणदेवेशमयागुग्गुलकल्पितं
इतिधूपं हिरण्यवाल्लोसेनानांईशानसापतेप्र
भो दीपंगृहाण कर्पूरकल्पितांत्रिवर्तिकं ॥
इतिदीपं अमानामपिसर्वेषांपतदीनार्तिना
शक षड्रसैश्वसमायुक्तंगृहाणनैनिवेदि
तं इतिनैवेद्यं राजाधिराजदेवेशनिराकवृक्ष
तस्माद फलंगृ[illegible]थंनालिकेलादिकं
परं इतिफलम् पाश्वतश्रीमयोनंदमद
नोनकपूर्जटे गृहाणसुगतांबूलंदलचूर्णं
खुवादिरं इतितांबूलं हिरण्यगर्भलोके
शाहेमवीजंविभावसो अनंतपुण्यफलदम
तःशांतिंप्रयच्छमे इतिदक्षिणां हरविश्वा
खिलाधारनिराधारनिराश्रय पुष्पांजलि
मिमांशंभोगृहाणवरदोभव इतिपुष्पांजलिं
यानिकानिचपापानिब्रह्महत्यासमानिच

शि:
पृ. ११

नातिनातिप्रणाशयंति प्रदक्षिणं च पदे पदे इति
प्रदक्षिणं मृडानीनाथमेसर्वामघगाथाननेक
धात् नमस्यामि त्वां प्रणामं मे गृहाण गाछ्यांगसं
भवं इति नमस्कारः ईशानः सर्वविद्यानामीं
कारस्त्वं वनेश्वर मंदिरं गच्छ देवेशा पुनरापाहि
शंकर ५३ इति विसर्जनं नदाक्षिण्यजलेस
म्यक् परं लिंगं निवेशयेत् अदृष्टविषयेवा
पिष्यापयेत्तु नमोस्तुथी श्रोतस्मार्तसदाचा
रैर्ब्राह्मणैः वेदमंत्रितः पंचाक्षरेण संयुक्तक
र्मव्यानियतालभिः मृदानयनमत्पिंडिक
रणं लिंगयोजनं प्रतिष्ठावाहनस्नानंपूज
नं च विसर्जनं भवशंभोमहारुद्रस्तपपशुप
तिश्रियः उग्रसहमहाभीमस्तथेशानोभिः
क्रमात् हरोमहेश्वरः शंभुः शूलपाणिपिना
कध्वक् शिवः पशुपतिश्चैव महादेवेतिविस
र्जनं मृदाहरणसंघट प्रतिष्ठाध्यानमेव च

स्नापनंपूजनंचैवदत्वमस्वेतिविसर्जनं नारदउवा
च केनदेवविधानेनकर्त्तव्यंसर्वकामिकं य
स्यपूजनमात्रेणकृतकृत्योभवेन्नरः ९१ ईश्वरउ
वाच कर्त्तव्यंहिन्नरभिर्नित्यंकाममुद्दिश्ययत्न
तः मेलिंगंपार्थिवंतस्यभुक्तिमुक्तिकरंपरं
नकरोतियदाज्ञात्वातस्यकार्यंनसिध्यति ९२
देशिकान्सकलंज्ञात्वाकुर्यात्लिंगफल
प्रदं विद्यार्थीशतसाहस्रंधनार्थीचसहस्रकं ९३
पुत्रार्थीसार्द्धसाहस्रंकन्यार्थीचसहस्रकं वं
ध्यालिंगायुतंकुर्यात्सर्वपापहरंपरं ९४ रा
ज्यार्थीशतसाहस्रंकन्यार्थीशतपंचकं मो
क्षार्थीकोटिगुणितंभक्तिकामसहस्रकं ९५
भयार्थीतुत्रिसाहस्रंतीर्थार्थीद्विसाहस्रकं
लिंगमस्तकविस्तारंलिंगोऽर्द्धंकायसमन्वितं
परिधिस्त्रिगुणीकृत्वातदर्द्धंपरिनालका १
ॐभास्करायत्रैलोकात्मनेमंमहीपतिंमम

शि· वषट्कुरुकुरुस्वाहा ॐनमोभगवतेवासुदे
पृ·१२ वायधन्वंत्रयेअमृतकलशहस्तायसर्वाम
यविनाशनायत्रैलोक्यनाथायश्रीमहावि
ष्णवेस्वाहा ॥

12

नं० ५६३८ – घ

(पार्थिव) शिवपूजा (धर्मशास्त्रम्)

पत्राणि १२. (संपूर्णम्)

नं० ~~११८२~~